# Kadrukrita Shiva Stuti

## કદ્રૂકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Kadrukrita Shiva Stuti

File name : kadrUkRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 26 shivaprasAdaH | 23-26||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# કદ્રૂકૃતા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
શમ્ભો વિશ્વમહેશ શઙ્કરજટાજૂટૈક ગઙ્ગાધર
સ્ફારાવારસ્ફુલિઙ્ગનેત્રનિવહજ્વાલાવિદગ્ધાન્તક ।
શમ્ભો વિશ્વેશ શમ્ભો શશિગિરિતટિનીજૂટકૂટોજ્જ્વલાઙ્ગ
જ્વાલાનેત્રાબ્જજાતોત્તમવરશિરસામ્માલિકાલઙ્કૃતાઙ્ગ ॥ ૨૩॥

ઉક્ષાઙ્ગાપાઙ્ગસઙ્ગ સ્ફુરદુરુપદભૂદિવ્યમાતઙ્ગભઙ્ગ
નાગાઙ્ગાભઙ્ગગઙ્ગાજલલવકુટિલાલોલદિવ્યોત્તમાઙ્ગ ।
પાહીશ પ્રમથેશ ચારુકરુણામૂર્તેઽરુણાદ્રિસ્થિત
પારાવારમહાઘસાગરતરીશ્રીકર્ણધાર પ્રભો ॥ ૨૪॥

પુત્રાન્મે શરણાગતાન્કરુણયા જ્વાલોરુનેત્ર પ્રભો
પાહીશાન દયાનિધાન અરુણભ્રાતુર્ભયાત્પીડિતાન્ ।
ચન્દ્રાપીડ મહેશ તે ચરણયોર્ભક્તિપ્રભાભાવિતાન્
નાસ્ત્યન્યત્તવપાદયોઃ શશિકલામૌલે શરણ્યં પરમ્ ॥ ૨૫॥

ત્વં માતાસિ પિતાસિ સર્વજગતાં તેન ત્વમેવેશ્વર-
સ્ત્વત્તો મે સુતવૃન્દમેતદધુના પ્રાપ્નોતુ સૌખ્યં વિભો ।
બિભ્યદ્વારુડભીતિતોગતિપરં ત્વામેવ યાચે શિવ
(દ્રુહ્યદ્વારુડભીતિતઃ પરગતિં ત્વામેવ યાચે શિવ)
તત્ ત્રાણાય ભવાધુના શરણદ ત્વત્તોઽભિકાઙ્ક્ષે વરમ્ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કદ્રૂકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૨૬ શિવપ્રસાદઃ । ૨૩-૨૬॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 26 shivaprasAdaH . 23-26..

Notes:

Kadrū કદ્રૂ; the mother of Nāga-s નાગાઃ, prays to Śiva શિવ to provide protection to her progeny from Garuḍa ગરુડ.

Proofread by Ruma Dewan

*Kadrukrita Shiva Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*